संस्कृत

सं. क्र. १२६

पद्धति

गायत्रीपुरश्चरणपद्धति.

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

॥१॥ श्रीगणेशायनमः ॥ अथगायत्रीपुरश्चरणेप्रधानदेवतार्चापद्धतिर्लिख्य
ते ॥ अद्येत्यादिश्रीपरमेश्वरप्रीत्यर्थंश्रीब्रह्मविद्यागायत्र्याः पुरश्चरणां
गतयाश्रीगायत्र्याः सावरणायाः पूजनंकरिष्ये ॥ तत्रादौसंध्यावंदनंक
रिष्येइतिसंकल्प्य ॥ ब्राह्मेमुहूर्तेउत्थायरात्रिवासोविहायहस्तपादौप्र
क्षाल्यआचम्यश्रीगुरुंध्यायेत् ॥ तत्राचमनविधिः ॥ केशव । नारायण ।
माधवेतित्रिराचम्यगोविंदादिरूपांतंयथास्थानविन्यस्यप्राणायामं
कुर्यात् ॥ ब्रह्मरंध्रस्थश्वेतसहस्रदलकमलकर्णिकांतर्गतचिदमृत
मंडलमध्यस्थहंसपीठस्थंश्रीगुरुंध्यात्वा ॥ मानसोपचारैः संपूज्यप्र
णम्यतद्रूपमात्मानंध्यायन् ॥ गायत्रीवाच्यमात्मानमात्मरूपंतेजोमंडलादि ॥१॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(1A) विधिविलांतं ध्यात्वा तत्प्रभा विश्रमात्म देहं ध्यात्वा यथा वदुच्चारादि मुख

प्रक्षालनांतं निर्वर्त्य: स्वशाखोक्त मार्गेण स्नात्वा त्रिकालिकाद्यर्ध्यांतां संध्यां

विधाय ॥ प्रणवस्य ब्रह्मा ऋषि: ॥ परमात्मा देवता । देवी गायत्री छंद: ॥ स

प्तानां व्याहृतीनां जमदग्नि भरद्वाज अत्रि गोतम कश्यप विश्वामित्र वसि

ष्ठा ऋषय: ॥ गायत्र्युष्णिगनुष्टुप् बृहती पंक्ति त्रिष्टुप् जगत्य: छंदांसि ॥

अग्निर्वायु सूर्य बृहस्पति वरुण इंद्र विश्वेदेवा देवता: ॥ गायत्र्या गायत्री

शिरसो ब्रह्मा ऋषि: ॥ देवी गायत्री छंद: ॥ परमात्मा देवता ॥ प्राणायामे वि

नियोग: ॥ ततो यथोपदेशं मनसैकवारं गायत्री जपं कृत्वा मनासया वायुं ह

छंदो विश्वामित्र ऋषि: ॥ सविता देवता । अग्निर्मुखं । ब्रह्मा शिर: । विष्णुर्हृदयं । गायत्री

(२)

२ येत्तथैवकुंभयित्वा॥तथैवरेचयेत्॥अयमेकः प्राणायामः॥एवं प्राणायामत्रयं कृत्वा॥
शिरसि विश्वामित्रऋषये नमः॥मुखे गायत्री छंदसे॰हृदि सवितृदेवतायै॰ज
पे न्यासे वि॰॥इति कृतांजलिर्वदेत्॥ॐ तत्सवितुर्ब्रह्मात्मने अंगुष्ठाभ्यां नमः॥
ॐ वरेण्यं विष्ण्वात्मने तर्जनीभ्यां स्वाहा॥ॐ भर्गो देवस्य रुद्रात्मने मध्यमा
भ्यां वषट्॥ॐ धीमहि ईश्वरात्मने अनामिकाभ्यां हुं॥ॐ धियो यो नः सदा
शिवात्मने कनिष्ठिकाभ्यां वौषट्॥ॐ प्रचोदयात् सर्वात्मने करतलकरपृ
ष्ठाभ्यां फट्॥एवं हृदयादि॥एवं न्यासं विधाय यथाशक्ति जप्त्वा जपं देव्यै
निवेद्य उपस्थाय गुर्वाद्यभिवादनं कृत्वा संध्यां समाप्य॥आचम्य पूर्व
वत्प्राणायामं कृत्वा॥बाह्यपूजामारभेत्॥द्वारदेवतार्चनं॥द्वारस्य पु २

The Rajawade Sanshodhan Mandal, Dhule & the Yashwantrao Chavan Pratishthan, Mumbai

(2A)

रतः ॥ ॐ नमः सूर्याय ॥ ॐ गं गणपतये० प्रणवः सर्वत्र ॥ सं सरस्वत्यै ॥ सं
सवित्रे ॥ हां सदाशिवाय ॥ ऐं ह्रीं श्रीं परशक्तये ॥ दीं दीपनाथाय० क्षं
क्षेत्रपालाय ॥ इति दक्षिणसव्यभागे एकैकमक्षतैः संपूज्यैवं प्रति
द्वारं ॥ ततः पश्चिमे द्वारे साक्षतं सूर्यायार्घ्यं दत्वा वामांगं संकोच्य
मंडपांतः प्रविश्य वेदीमुपस्य हर्वद्वारे ऊर्ध्वं द्वारश्रियै ॥ देह
ल्यै । दक्षिणसव्यभागयोः ॥ धात्रे० विधात्रे० गंगायै० यमुनायै ।
भद्रायै । सुभद्रायै । एवं दक्षिणपश्चिमोत्तरद्वारेषु देहल्यादि
विधात्रंतं संपूज्य दक्षिणसव्ययोः ॥ गोदावर्यै । कृष्णायै । वं

Joint Project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai.

(3)

।१०।।

डायै। प्रचंडायै। पश्चिमतः।। रेवायै। नाप्यै। शंखनिधये। पद्मनिधये।
उत्तरतः।। वाणायै। वेण्यै। महानिधये। महेश्वराय। गृहोपरिगृहेशा
य। गृहमध्ये यागगृहाय।। कुलदेव्यै।। वेदिकायामधिष्ठितदेवताः
पूजयेत्।। शेषाय। विद्यापीठाय। वास्तुपुरुषाय। आसनविधिः।।
पृथिव्या।।। आधारशक्त्यै। अनंताय। कूर्माय। वराहाय।। आस
नाय।। विमलासं। सुखासनाय।। वामपादकरास्फोटसमुदंचि
तवक्त्रै। भूम्यंतरिक्षदिव्यान्भूतसंधान्उत्सायछोटिकयादश
दिग्बधंकुलाभूतशुद्धिप्राणप्रतिष्ठांतर्मातृकाबहिर्मातृकाः।।७।।

(3A) न्यासान् विधाय॥ ॐ गोविंदाय अंगुष्ठाभ्यां॥ महीधराय तर्जनीभ्यां। हृषिके
शाय मध्यमाभ्यां॥ त्रिविक्रमाय अनामिकाभ्यां। ॐ विष्णवे कनिष्ठिकाभ्यां।
ॐ माधवाय करतलकरपृष्ठाभ्यां॥ एवं हृदयादि॥ अथ प्राणायामविधिः॥
ॐकारस्य ब्रह्मा ऋषिः॥ गायत्री छंदः॥ परमात्मा देवता॥ अं बीजं। उं श
क्तिः। मं कीलकं। विद्युद्वर्णः। उदात्तस्वरः। ज्ञातव्यं गोत्रं॥ भूर्भुवस्वः क्षेत्रं।
ऋग्यजुःसामाथर्वस्वरूपं। संध्या[illegible] अग्निस्थानं। ब्रह्मतत्वं। निर्गुणास
वर्ण उपांशुसवनानि। आत्मास्वरूपं। तुर्यावस्था। योगमुद्रा। ब्रह्म
वाप्तिः फलं॥ प्रणवमात्राणां वसिष्ठविश्वामित्रभरद्वाजा ऋषयः। ब्र
ह्माविष्णुमहेश्वरा देवताः॥ गायत्रीत्रिष्टुब्जगत्यः छंदांसि॥ भूरंतरि 5

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(५)

॥४॥ क्षं द्यौः स्थानानि ॥ गार्हपत्यदक्षिणाग्न्याहवनीयारूपाणि ॥ पीतविद्युच्छुक्लवर्णाः ॥
जाग्रत्स्वप्नसुषुप्तयोवस्थाः ॥ प्रातर्मध्यंदिनतृतीयसवनानि ॥ ब्रह्मविष्णु
रुद्रपदावासिः फलं ॥ अर्धमात्राबिंदुनादनं ॥ पुरुषहंसऋषभध्वजान्वृ
षयः ॥ परमात्मा परमहंसऋषभध्वजा देवता ॥ विराडव्यक्तपंक्तिरिति छं
दांसि ॥ मायाबुधिसरस्वत्यः शक्तयः ॥ आत्मजीव उदान इति बीजानि ॥ अ
थर्वेतिहास सर्वोपनिषदः स्वरूपाणि ॥ सभ्यावसथ्यान्त्यग्नयः स्था
नानि ॥ इत्यष्टका ॥ षट्त्रिंशद्द्वारं प्रणवेन प्राणानायम्य ॥ प्रणवेन पादादि
शिरोंतं त्रिर्व्यापकं कृत्वा ॥ ॐ अं अंगुष्ठाभ्यां॰ ॥ उं तर्जनीभ्यां॰ ॥ मं मध्यमाभ्यां॰ ॥ ४ ॥

(9A)

अंअनामिकाभ्यां०॥उंकनिष्टिकाभ्यां०॥मंकरतलकरपृष्ठाभ्यां०॥एवंप्रण
वन्यासंकृत्वाहृदयादिशिरांतंन्यस्य॥अंनाभौ।उंहृदये।मंशिरसितिन्यसे
त्॥अथांगेप्रणवान्न्यसेत्॥पादयोश्चत्वारः४जान्वोर्द्वौ२ऊर्वोः५मेढ्रे६
स्फिचि२गुल्ये१०उदरे१०वक्षसि२गले१०बाह्वो२अंसयो२मुखे२न
सोः२चक्षुषोः२कर्णयोः२मूर्ध्नि२आधारप्रमुखसर्वपीठदेवताभ्योनमः॥
देहेत्रिधामात्रादेवताभ्योनमः॥वह्निमंडलायासूर्यमं०सोममंडं०सर्व
शक्तिकमलासनायनमः॥ततोध्यानं॥हृत्पद्ममध्येपुरुषंपुराणंसत्यात्म
कंसर्वजगत्स्वरूपं॥ध्यायामिनित्यंपरमात्मसंज्ञंचिद्रूपमेकंप्रणवार्थ
तत्वं॥इतिध्यात्वा॥घंटावत्सायंमष्टाविंशाद्वारंप्रणवंजपेत्॥भूरित्यस्य

(5)

॥५॥ विश्वामित्रऋषि:॥अग्निर्देवता॥गायत्रीछंद:॥श्वेतोवर्ण:॥षड्जस्वर:॥पृथिवी
बीजं॥श्री:शक्ति:॥अग्निवेश्यं गोत्रं॥शाद्बस्तत्वं॥विततमुद्रा॥प्राणजनितपा
पोपशमनार्थेन्यासेजपेविनियोग:॥ॐ भू: पद्भ्यां नम:॥भुव:इत्यस्यजमद
ग्निऋषि:॥वायुर्देवता॥उष्णिक्छंद:॥सामवर्ण:॥ऋषभ:स्वर:॥आपोबी
जं॥कीर्ति:शक्ति:॥काश्यपगोत्रं॥स्पर्शस्तत्वं॥समांजलिकमुद्रा॥अपानज
निजपा०ॐ भुव:जानुभ्यां०॥स्व: इत्यस्यभरद्वाजऋषि:॥सूर्योदेवता॥अ
नुष्टुप्छंद:॥पीतोवर्ण:॥गांधारस्वर:॥तेजोबीजं॥मायाशक्ति:॥गौतम
सगोत्रं॥रूपंतत्वंशाकटमुद्रा॥व्यानजनितपापा०स्व:गुह्याय०॥ॐ मह
रित्यस्य॥गौतमऋषि:॥बृहस्पतिर्देवता॥बृहतीछंद:॥पिंगवर्ण:॥ ५॥

(5A) मध्यमः स्वरः ॥ वायुबीजं ॥ धृतिः शक्तिः ॥ आंगिरससगोत्रं ॥ रसस्तत्वं ॥ वि
स्तृतमुद्रा ॥ उदानजनितपापो० ॥ ॐ महः नाभ्यै ॥ ॐ जनः इत्यस्य ॥ अ
त्रिर्ऋषिः ॥ वरुणो देवता ॥ पंक्ती छंदः ॥ नील वर्णः ॥ पंचमः स्वरः ॥ आकारो
बीजं ॥ मेधा शक्तिः ॥ भार्गवसगोत्रं ॥ गंधस्तत्वं ॥ यमपाशमुद्रा ॥ समा
नजनितपा० ॥ ओं जनः हृदयाय ॥ तप इत्यस्य वसिष्ठऋषिः ॥ इंद्रो दे
वता ॥ त्रिष्टुप् छंदः ॥ लोहित वर्णः ॥ धैवत स्वरः ॥ दिग्बीजं ॥ स्मृतिः
शक्तिः ॥ कौशिकसगोत्रं ॥ मनस्तत्वं ॥ ग्रथितमुद्रा ॥ मनोजनितपा
पापहाम नार्थे० ॥ ॐ तपः कंठाय ॥ ॐ सत्यमित्यस्य ॥ कश्यपऋषिः ॥
विश्वेदेवा देवता ॥ जगती छंदः ॥ कृष्णो वर्णः ॥ निषादः स्वरः ॥ आत्मा

(६)

॥५॥ बीजं ॥ वाचाशक्तिः ॥ वसिष्ठसगोत्रं ॥ बुधिस्तत्तं ॥ व्यापकमुद्रा ॥ बुधिजनि
तपापोपशमनार्थेन्यासेविनियोगः ॥ ॐ सत्यं मूर्ध्ने ॥ ॐ तत्स वितुरित्य
स्याः गायत्र्या विश्वामित्र ऋषिः ॥ सविता देवता ॥ गायत्री छंदः ॥ अग्नि
र्मुखं ब्रह्मा शिरः ॥ विष्णुर्हृदयं ॥ रुद्रो ललाटं ॥ पृथ्वी योनिः ॥ त्रैलोक्यं चरणाः ॥
प्राणापानव्यानोदानसमानाः सप्राणा श्वेतवर्णा सांख्यायनसगोत्रा ॥ त्रि
पदा षट्कुक्षिः पंचशीर्षोपनयने फलं ॥ त्रैलोक्यं चरणाः ॥ वरेणीति बी
जं ॥ यामिति शक्तिः ॥ या कीलकं ॥ त्रिपदा गायत्री अशेषपापक्षयार्थे न्या
से जपे विनियोगः ॥ ॐ तत्सवितुर्ब्रह्मात्मने अंगुष्ठाभ्यां ॥ वरेण्यं विष्ण्वा ॥५॥
त्मने तर्जनीभ्यां ॥ भर्गो देवस्य रुद्रात्मने मध्यमा ॥ धीमहि ईश्वरात्म

(6A)

नेअनामि०॥ धियोयोनः सदाशिवात्मने कनिष्ठिकाभ्यां॥ प्रचोदयात् सत्यात्मने क
रतलकरपृ०॥ एवं हृदयादि॥ अथ चरणन्यासः॥ गायत्र्याः अनुष्टुप् चरण
नां अग्निर्वायुः कण्वाऋषयः॥ ब्रह्मविष्णुमहेश्वरा देवताः॥ गायत्र्युष्णिक्
त्रिष्टुप् छंदांसि॥ चरणन्यासे॥ ॐ भूः तत्सवितुर्वरेण्यं भूरग्नये पृथिव्यै
ब्रह्मणे लोकत्रयात्मने पादाभ्यां॥ ॐ भुवः भर्गो॰ भुवोंतरिक्षाय वायवेंतरिक्षा
त्मने हृदयाय०॥ ॐ स्वः धियोयोनः प्र० स्वरादित्याय महेश्वरात्मने यज्ञा
पात्रयात्मने शिरसे॥ ॥अथ पदन्यासः॥ ॥दशानां गायत्रीपदानामग्निवा
युसूर्यवरुणप्रजापतिब्रह्माहंसांतर्यामिमहादेवश्चातातपाऋषयः॥ ब्रह्मावि
ष्णुमहेश्वरा वरुणयमेंद्रार्यमाश्विपर्जन्यविश्वेदेवा देवताः॥ गायत्र्युष्णिग
नुष्टुप् जगती बृहती पंक्तयः॥ छंदांसि॥ शेषाणां चतुर्णां पदानां गायत्रीछं

॥७॥ दः॥ पदन्यासे विनि०॥ ॐ तत् पादाभ्यां॥ सवितुः जंघाभ्यां० वरेण्यं कट्यै० भर्गः ना
भ्यै०॥ देवस्य हृदयाय०॥ धीमहि कंठाय॥ धियः मुखाय०॥ यः नेत्राभ्यां०॥ नः ललाटा
य०॥ प्रचोदयात् मूर्ध्ने०॥ अथाक्षरन्यासः॥ ॐ तकारस्य वसिष्ठ ऋषिः॥ अ
ग्निर्देवता॥ गायत्रीछंदः॥ उदात्तस्वरः॥ चंपकवर्णः॥ पृथ्वीतत्वं॥ अंबीजं॥ स
हाशक्तिः॥ सुमुखमुद्रा॥ पातकरामनाथेन्यासे०॥ ॐ त पादाभ्यां०॥ सका
रस्य भरद्वाज ऋषिः॥ वायुर्देवता॥ उष्णिक्छंदः॥ स्वरितः स्वरः॥ अतसीपुष्प
वर्णः॥ आपस्तत्वं॥ इंबीजं॥ प्रभावतीशक्तिः॥ संमुटमुद्रा॥ उपपातकरामं
नाथे०॥ ॐ स गुल्फाभ्यां०॥ विकारस्य॥ गौतम ऋषिः॥ सूर्यदेवता॥ अ
नुष्टुप्छंदः॥ अनुदात्तः स्वरः॥ कपिलोवर्णः॥ तेजस्तत्वं॥ उंबीजं॥ नित्या
शक्तिः॥ विततमुद्रा॥ महापातकरामनाथेन्यासे०॥ ॐ विं जंघाभ्यां०॥ ॥७॥

(7A) ॐ नुकारस्य भृगुर्ऋषिः ॥ विष्णुर्देवता ॥ बृहती छंदः ॥ उदात्तस्वरः ॥ इंद्रनीलाभो वर्णः

वायुस्तत्वं ॥ ऋ बीजं ॥ शोभना शक्तिः ॥ विस्तृत मुद्रा ॥ ग्रहरोगशमनार्थे ॥ ॐ

नु आनुभ्यां ॥ नकारस्य शांडिल्य ऋषिः ॥ अर्यमा देवता ॥ पंक्ती छंदः ॥ उदात्त

स्वरः ॥ अग्न्याभो वर्णः ॥ आकाशस्तत्वं ॥ न्रं बीजं ॥ अजा शक्तिः ॥ द्वि मुखमु

द्रा ॥ भ्रूणहत्या पापक्षयार्थे ॥ वं ऊरुभ्यां ॥ ५ ॥ रेकारस्य लोहित ऋषिः ॥

इंद्रो देवता ॥ त्रिष्टुप् छंदः ॥ स्वरितः स्वरः ॥ स्फटिकाभो वर्णः ॥ गंधस्तत्वं ॥

एं बीजं ॥ भद्रा शक्तिः ॥ त्रिमुख मुद्रा ॥ अगम्यागमनपापक्षयार्थे ॥ रे

गुल्फाय ॥ ६ ॥ णिकारस्य गर्ग ऋषिः ॥ विश्वे देवा देवता ॥ जगती छंदः ॥

उदात्त स्वरः ॥ विद्युदाभो वर्णः ॥ रसस्तत्वं ॥ एं बीजं ॥ विमला शक्तिः ॥

(8)

॥८॥ चतुर्मुखमुद्रा॥ अभक्ष्याभक्षणजनितपापक्षयार्थे॰॥ ॐ नितंबाभ्यां॰॥ ७॥
यंकारस्य राभुर्ऋषिः॥ पर्जन्यो देवता॥ प्रकृती छंदः॥ अनुदात्तस्वरः॥ तारका
भो वर्णः॥ रूपं तत्वं॥ ॐ बीजं॥ प्रभावती शक्तिः॥ पंचमुखमुद्रा॥ पुंवधपाप
क्षयार्थे॰॥ ॐ पं कटीभ्यां॰॥ ८॥ भकारस्य सनत्कुमार ऋषिः॥ इंद्रो देवता॥
सत्यंछंदः॥ उदात्तस्वरः॥ मेधाभो वर्णः॥ स्पर्शस्तत्वं॥ ओं बीजं॥ माया
शक्तिः॥ षण्मुखमुद्रा॥ गुरुवधपापक्षयार्थे॰॥ ॐ भं नाभ्ये॰॥ ९॥ गोंकार
स्य सत्यवान् ऋषिः॥ गंधर्वो देवता॥ विराट् छंदः॥ स्वरितः स्वरः॥ रक्तो वर्णः॥
शब्दस्तत्वं॥ अं बीजं॥ प्रभावती शक्तिः॥ अधोमुखमुद्रा॥ गोवधपापक्षया
र्थे॰॥ १०॥ गों जठराय॰॥ देकारस्य गंधर्व ऋषिः॥ सत्यो देवता॥ विराट्पंक्ती ॥८॥

(8A)

छंदः॥ अनुदात्तः स्वरः॥ मरकताभो वर्णः॥ वाकृतत्वं॥ अकारो बीजं॥ प्रह्लादि
नी शक्तिः॥ आपकांजलिमुद्रा॥ स्त्रीवधपापक्षयार्थे॥ ॐ हेस्तनाभ्यां नमः॥
ॐ वकारस्य कश्यप ऋषिः॥ मित्रावरुणौ देवता॥ अक्षरपंक्तीछंदः॥ उदात्त
स्वरः॥ शुक्लो वर्णः॥ हस्तौ तत्वं॥ कं बीजं॥ कांता शक्तिः॥ शकटमुद्रा॥ वाक्
दोषाद्यादि पापक्षयार्थे॥ वं हृदयाय नमः॥ १२॥ स्य कारस्य कश्यप ऋषिः॥
त्वष्टा देवता॥ कात्यायन छंदः॥ स्वरितः स्वरः॥ कांचनाभो वर्णः॥ उपस्थं
तत्वं॥ च बीजं॥ जिह्वा शक्तिः॥ यमपाशमुद्रा॥ ग्रामकोटिहत्यपापक्षयार्थे
न्या॥ स्य कंठाय नमः॥ १३॥ पृथि कारस्य अत्रि ऋषिः॥ वसवो देवता॥ विरा
ट्पंक्ती छंदः॥ प्रचय स्वरः॥ कुंदाभो वर्णः॥ पायुस्तत्वं॥ तं बीजं॥ सर

(९)

॥९॥ स्वनीशक्तिः॥ ग्रंथितमुद्रा॥ पितृवधपापक्षयार्थेन्यासे०॥ धीमुखाय०॥१४॥
मकारस्य विष्णुऋषिः॥ मरुतादेवता॥ कात्यायनीछंदः॥ शक्तिः॥ पंक्ति
छंदः॥ प्रचयःस्वरः॥ पद्माभोवर्णः॥ पादौतत्वं॥ तबीजं॥ विद्युद्वर्णः॥ स
न्मुखमुद्रा॥ सर्वजन्मार्जितपापक्षयार्थेन्या०॥ मतालुने०॥१५॥ ॐहिका
रस्य। पराशरऋषिः॥ त्वष्टादेवता॥ अक्षरपंक्तीछंदः॥ प्रचयःस्वरः॥ द्रा
क्षाभोवर्णः॥ श्रोत्रंतत्वं॥ पंबीजं॥ विश्वरूपाशक्तिः॥ प्रलंबमुद्रा॥ प्रति
ग्रहार्जितपापक्षयार्थेन्या०॥ ॐहनासापुटाय॥१६॥ धिकारस्य पुंडरी
कऋषिः॥ अंगिरसोदेवता॥ कात्यायनंछंदः॥ उदात्तस्वरः॥ पांडुरो
वर्णः॥ वक्तृतत्वं॥ यंबीजं॥ विभूतिःशक्तिः॥ मुष्टिकमुद्रा॥ मातृवध ॥९॥

(9A)

पापक्षयार्थेन्या॥ ॐ घ्रिनेत्राभ्यां॥१७॥ यो कारस्य ऋमुक ऋषिः॥ विश्वे
देवा देवता॥ जगती छंदः॥ अनुदात्त स्वरः॥ रुक्मा भो वर्णः॥ चक्षुस्तत्वं॥
रं बीजं॥ ज्ञानी शक्तिः॥ मीनमुद्रा॥ जन्मार्जित पापक्षयार्थे॥ ॐ यो भ्रकु
टीभ्यां॥१८॥ यो कारस्य दक्ष ऋषिः॥ विश्वेदेवा देवता॥ जगती छंदः॥ उ
दात्तः स्वरः॥ विद्युद्राभो वर्णः॥ घ्राणतत्वं॥ लं बीजं॥ गंधा शक्तिः॥ कूर्ममुद्
रा॥ सप्तजन्मार्जित पापक्षयार्थे॥ ॐ यो ललाटाय॥१९॥ नः कारस्य
अंगिरा ऋषिः॥ भर्गो देवता॥ बृहती छंदः॥ स्वरितः स्वरः॥ सूर्याभो व
र्णः॥ जिह्वातत्वं॥ वं बीजं॥ रतिः शक्तिः॥ वराहमुद्रा॥ विरिंचिपदप्राप्त्य

(10)

॥१०॥ र्थेन्यासे०॥ॐ नः सर्ववक्त्राय॥२०॥ॐ प्रकारस्य कार्तिकेय ऋषि:॥ज्ञावोदेव
ता॥भुवः छंदः॥प्रचयस्वरः॥इं इंद्रनीलाभो वर्ण:॥मनस्तत्वं॥शं बीजं॥प्री
तिः शक्तिः॥सिंहाक्रांतमुद्रा॥विरूपदर्शायर्थेन्यासे०॥ॐ प्रदक्षिणपूर्व
वक्त्राय०॥२१॥ओं चोकारस्य महारुद्र ऋषि:॥ब्रह्मा देवता॥सत्यं छंदः॥
अनुदात्तस्वरः॥कुंकुमाभो वर्णः॥अहंकारस्तत्वं॥वं बीजं॥पद्मालया
शक्तिः॥महाक्रांतमुद्रा॥रुद्रपदप्राप्त्यर्थेन्यासे०॥ॐ चोपश्चिमवक्त्रा
य०॥२२॥दकारस्य अगस्त्य ऋषि:॥ब्रह्मा देवता॥स्वराट् छंदः॥उदात्त
स्वरः॥कुंकुमाभो वर्णः॥चित्तं तत्वं॥सं बीजं॥विलासिनी शक्तिः॥मुद्गर
मुद्रा॥सगुण ब्रह्मपदप्राप्त्यर्थे न्या०॥ॐ द उत्तर वक्त्राय०॥२३॥याको ॥१०॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com